# 41 - एकचत्वारिंश दशकम्
# पूतना दहनम्

व्रजेश्वरैश् शौरि वचो निशम्य समाव्रजन् नध्वनि भीत चेता: ।
निष्पिष्ट निश्शेष तरुं निरीक्ष्य कञ्चित् पदार्थं शरणं गतस् त्वां ॥41-1॥

निशम्य गोपी वचना दुदन्तं सर्वेऽपि गोपा भय विस्मयान्धा: ।
त्वत्पातितं घोर पिशाच देहं देहुर् विदूरेऽथ कुठार कृत्तम् ॥ ॥41-2॥

त्वत्पीत पूत स्तन तच्छरीरात् समुच्चलन् नुच्चतरो हि धूम: ।
शङ्का मधा दागरव: किमेष: किं चान्दनो गौल्गुलवोऽथवेति ॥ ॥41-3॥

मदङ्ग सङ्गस्य फलं न दूरे क्षणेन तावत् भवता मपि स्यात् ।
इत्युल्लपन् वल्लव तल्लजेभ्य: त्वं पूतना मातनुथास् सुगन्धिम्॥॥41-4॥

चित्रं पिशाच्या न हत: कुमार: चित्रं पुरै वाकथि शौरिणेदम् ।
इति प्रशंसन् किल गोपलोको भवन् मुखालोक रसे न्यमाङ्क्षीत् ॥॥41-5॥

दिने दिनेऽथ प्रति वृद्ध लक्ष्मी: अक्षीण मङ्गल्य शतो व्रजोऽयम् ।
भवन् निवासा दयि वासुदेव प्रमोद सान्द्र: परितो विरेजे ॥ ॥41-6॥

गृहेषु ते कोमल रूप हासमिथ: कथा सङ्कुलिता: कमन्य: ।
वृत्तेषु कृत्येषु भवन् निरीक्षा समागता: प्रत्यह मत्यनन्दन् ॥ ॥41-7॥

अहो कुमारो मयि दत्त दृष्टि: स्मितं कृतं मां प्रति वत्सकेन ।
एह्येहि मामित्युप सार्यपाणी त्वयीश किं किं न कृतं वधूभि: ॥॥41-8॥

भवत्-वपुस् स्पर्शन कौतुकेन करात्करं गोप वधू जनेन ।
नीतस् त्व माताम्र सरोजमाला व्यालम्बि लोलम्ब तुला मलासी: ॥॥41-9॥

निपाय यन्ती स्तन मङ्कगं त्वां विलोक यन्ती वदनं हसन्ती ।
दशां यशोदा कतमां न भेजे स ताद्दश: पाहि हरे गदान्माम् ॥ ॥41-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥